# Vishnupujavidhinirupanam

# विष्णुपूजाविधिनिरूपणम्

## Document Information

Text title : Vishnupujavidhinirupanam

File name : viShNupUjAvidhinirUpaNam.itx

Category : vishhnu, vishnu, garuDapurANa, pUjA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : garuDapurANa | pUrvakhaNDa |adhyAya 31/23-27||

Latest update : October 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2024

*sanskritdocuments.org*

# विष्णुपूजाविधिनिरूपणम्

रुद्र उवाच ।
भूय एवं जगन्नाथ पूजां कथय मे प्रभो ।
यया तरेयं संसारसागरं ह्यतिदुस्तरम् ॥ १॥

हरिरुवाच ।
अर्चनं विष्णुदेवस्य वक्ष्यामि वृषभध्वज ।
तच्छृणुष्व महाभाग भुक्तिमुक्तिप्रदं शुभम् ॥ २॥

कृत्वा स्नानं ततः सन्ध्यां ततो यागगृहं व्रजेत् ।
प्रक्षाल्य पाणी पादौ च आचम्य च विशेषतः ॥ ३॥

मूलमन्त्रं समस्तं तु हस्तयोर्व्यापकं न्यसेत् ।
मूलमन्त्रं च देवस्य शृणु रुद्र वदामि ते ॥ ४॥

ॐ श्रीं ह्रीं श्रीधराय विष्णवे नमः ।
अयं मन्त्रः सुरेशस्य विष्णोरीशस्य वाचकः ॥ ५॥

सर्वव्याधिहरश्चैव सर्वग्रहहरस्तथा ।
सर्वपापहरश्चैव भुक्तिमुक्तिप्रदायकः ॥ ६॥

अङ्गन्यासं ततः कुर्यादेभिर्मन्त्रैर्विचक्षणः ।
ॐ ह्रां हृदयाय नमः ।
ॐ ह्रीं शिरसे स्वाहा ।
ॐ ह्रूं शिखायै वषट् ।
ॐ ह्रैं कवचाय हुम् ।
ॐ ह्रौं नेत्रत्रयाय वौषट् ।
ॐ ह्रः अस्त्राय फट् ॥ ७॥

इति मन्त्रः समाख्यातो मया ते प्रभविष्णुना ।
न्यासं कृत्वात्मनो मुद्रां दर्शयेद्विजितात्मवान् ॥ ८॥

ततो ध्यायेत्परं विष्णुं हृत्कोटरसमाश्रितम् ।
शङ्खचक्रसमायुक्तं कुन्देन्दुधवलं हरिम् ॥ ९॥

श्रीवत्सकौस्तुभयुतं वनमालासमन्वितम् ।
रत्नहारकिरीटेन संयुक्तं परमेश्वरम् ॥ १०॥

अहं विष्णुरिति ध्यात्वा कृत्वा वै शोधनादिकम् ।
यं क्ष्रौं रमिति बीजैश्च कठिनीकृत्य नामभिः ॥ ११॥

अण्डमुत्पाद्य च ततः प्रणवेनैव भेदयेत् ।
तत्र पूर्वोक्तरूपं तु भावयित्वा वृषध्वज ॥ १२॥

आत्मपूजां ततः कुर्याद्गन्धपुष्पादिभिः शुभैः ।
आवाह्य पूजयेत्सर्वा देवता आसनस्य याः ॥ १३॥

मन्त्रैरेभिर्महादेव तन्मन्त्रं शृणु शङ्कर ।
विष्ण्वासनदेवता आगच्छत ॥ १४॥

ॐ समस्तपरिवारायाच्युताय नमः ।
ॐ धात्रे नमः ।
ॐ विधात्रे नमः ।
ॐ गङ्गायै नमः ।
ॐ यमुनायै नमः ।
ॐ शङ्खनिधये नमः ।
ॐ पद्मनिधये नमः ।
ॐ चण्डाय नमः ।
ॐ प्रचण्डाय नमः ।
ॐ द्वारश्रियै नमः ।
ॐ आधारशक्त्यै नमः ।
ॐ कूर्माय नमः ।
ॐ अनन्ताय नमः ।
ॐ श्रियै नमः ।
ॐ धर्माय नमः ।
ॐ ज्ञानाय नमः ।
ॐ वैराग्याय नमः ।
ॐ ऐश्वर्याय नमः ।

ॐ अधर्माय नमः ।
ॐ अज्ञानाय नमः ।
ॐ अवैराग्याय नमः ।
ॐ अनैश्वर्याय नमः ।
ॐ सं सत्त्वाय नमः ।
ॐ रं रजसे नमः ।
ॐ तं तमसे नमः ।
ॐ कं कन्दाय नमः ।
ॐ नं नालाय नमः ।
ॐ लं पद्माय नमः ।
ॐ अं अर्कमण्डलाय नमः ।
ॐ सों सोममण्डलाय नमः ।
ॐ वं वह्निमण्डलाय नमः ।
ॐ विमलायै नमः ।
ॐ उत्कर्षिण्यै नमः ।
ॐ ज्ञानायै नमः ।
ॐ क्रियायै नमः ।
ॐ योगायै नमः ।
ॐ प्रह्व्यै नमः ।
ॐ सत्यायै नमः ।
ॐ ईशानायै नमः ।
ॐ अनुग्रहायै नमः ॥ १५॥

गन्धपुष्पादिभिस्त्वेतैर्मन्त्रैरेतास्तु पूजयेत् ।
पूजयित्वा ततो विष्णुं सृष्टिसंहारकारिणम् ॥ १६॥

आवाह्य मण्डले रुद्र पूजयेत्परमेश्वरम् ।
अनेन विधिना रुद्र सर्वपापहरं परम् ॥ १७॥

यथाऽऽत्मनि तथा देवे न्यासं कुर्वीत चादितः ।
मुद्रां प्रदर्शयेत्पश्चादर्घ्यादीनर्पयेत्ततः ॥ १८॥

स्नानां कुर्यात्ततो वस्त्रं दद्यादाचमनं ततः ।
गन्धपुष्पं तथा धूपं दीपं दद्याच्चरुं ततः ॥ १९॥

प्रदक्षिणं ततो जप्यं ततस्तस्मिन्समर्पयेत् ।
अङ्गादीनां स्वमन्त्रैश्च पूजां कुर्वीत साधकः ॥ २०॥

देवस्य मूलमन्त्रेणेत्येवं विद्धि वृषध्वज ।
मन्त्राञ्छृणु त्रिनेत्र त्वं कथ्यमानान्मयाधुना ॥ २१॥

ॐ हां हृदयाय नमः ।
ॐ ह्रीं शिरसे नमः ।
ॐ ह्रूं शिखायै नमः ।
ॐ ह्रैं कवचाय नमः ।
ॐ ह्रौं नेत्रत्रयाय नमः ।
ॐ हः अस्त्राय नमः ।
ॐ श्रियै नमः ।
ॐ शङ्खाय नमः ।
ॐ पद्माय नमः ।
ॐ चक्राय नमः ।
ॐ गदायै नमः ।
ॐ श्रीवत्साय नमः ।
ॐ कौस्तुभाय नमः ।
ॐ वनमालायै नमः ।
ॐ पीताम्बराय नमः ।
ॐ खड्गाय नमः ।
ॐ मुसलाय नमः ।
ॐ पाशाय नमः ।
ॐ अङ्कुशाय नमः ।
ॐ शार्ङ्गाय नमः ।
ॐ शराय नमः ।
ॐ ब्रह्मणे नमः ।
ॐ नारदाय नमः ।
ॐ पूर्वसिद्धेभ्यो नमः ।
ॐ भागवतेभ्यो नमः ।
ॐ गुरुभ्यो नमः ।
ॐ परमगुरुभ्यो नमः ।

ॐ इन्द्राय सुराधिपतये सवाहनपरिवाराय नमः ।
ॐ अग्नये तेजोऽधिपतये सवाहनपरिवाराय नमः ।
ॐ यमाय प्रेताधिपतये सवाहनपरिवाराय नमः ।
ॐ निर्ऋतये रक्षोऽधिपतये सवाहनपरिवाराय नमः ।
ॐ वरुणाय जलाधिपतये सवाहनपरिवाराय नमः ।
ॐ वायवे प्राणाधिपतये सवाहनपरिवाराय नमः ।
ॐ सोमाय नक्षत्राधिपतये सवाहनपरिवाराय नमः ।
ॐ ईशानाय विद्याधिपतये सवाहनपरिवाराय नमः ।
ॐ अनन्ताय नागाधिपतये सवाहनपरिवाराय नमः ।
ॐ ब्रह्मणे लोकाधिपतये सवाहनपरिवाराय नमः ।
ॐ वज्राय हुं फट् नमः ।
ॐ शक्त्यै हुं फट् नमः ।
ॐ दण्डाय हुं फट् नमः ।
ॐ खड्गाय हुं फट् नमः ।
ॐ पाशाय हुं फट् नमः ।
ॐ ध्वजाय हुं फट् नमः ।
ॐ गदायै हुं फट् नमः ।
ॐ त्रिशूलाय हुं फट् नमः ।
ॐ चक्राय हुं फट् नमः ।
ॐ पद्माय हुं फट् नमः ।
ॐ वौं विष्वक्सेनाय नमः ॥ २२॥

एभिमन्त्रैर्महादेव पूज्या अङ्गादयो नरैः ।
पूजयित्वा महात्मानं विष्णुं ब्रह्मस्वरूपिणम् ॥ २३॥

स्तुवीत चानया स्तुत्या परमात्मानमव्ययम् ।
विष्णवे देवदेवाय नमो वै प्रभविष्णवे ॥ २४॥

विष्णवे वासुदेवाय नमः स्थितिकराय च ।
ग्रसिष्णवे नमश्चैव नमः प्रलयशायिने ॥ २५॥

देवानां प्रभवे चैव यज्ञानां प्रभवे नमः ।
मुनीनां प्रभवे नित्यं यक्षाणां प्रभविष्णवे ॥ २६॥

जिष्णवे सर्वदेवानां सर्वगाय महात्मने ।

ब्रह्मेन्द्ररुद्रवन्द्याय सर्वेशाय नमो नमः ॥ २७॥

सर्वलोकहितार्थाय लोकाध्यक्षाय वै नमः ।
सर्वगोप्त्रे सर्वकर्त्रे सर्वदुष्टविनाशिने ॥ २८॥

वरप्रदाय शान्ताय वरेण्याय नमो नमः ।
शरण्याय सुरूपाय धर्मकामार्थदायिने ॥ २९॥

स्तुत्वा ध्यायेत्स्वहृदये ब्रह्मरूपिणमव्ययम् ।
एवं तु पूजयेद्विष्णुं मूलमन्त्रेण शङ्कर ॥ ३०॥

मूलमन्त्रं जपेद्वापि यः स याति नरो हरिम् ।
एतत्ते कथितं रुद्र विष्णोरर्चनमुत्तमम् ॥ ३१॥

रहस्यं परमं गुह्यं भुक्तिमुक्तिप्रदं परम् ।
एतद्यश्च पठेद्विद्वान्विष्णुभक्तः पुमान्हर ।
शृणुयाच्छ्रावयेद्वापि विष्णुलोकं स गच्छति ॥ ३२॥

इति श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे
विष्णुपूजाविधिर्नामैकत्रिंशोऽध्यायः ॥ ३१॥

गरुडपुराण । पूर्वखण्ड । अध्याय ३१/२३-२७॥

garuDapurANa . pUrvakhaNDa . adhyAya 31/23-27..

Proofread by PSA Easwaran

*Vishnupujavidhinirupanam*

pdf was typeset on October 3, 2024

Please send corrections to *sanskrit@cheerful.com*